सौखिकः, त्रि, (सुखेन जीवतीति । सुख + "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।) सुखार्थी । सौखीन इति भाषा ॥ (यथा, महाभारते । १२ । १८ । २३ ।
"श्रिया विहीनैरधनैर्व्यतिक्रमितैरकिञ्चनैः ।
सौखिकैः सम्भृतानर्थान् यः सन्त्यजति किन्नु तत् ॥")

सौख्यं, क्ली, (सुखमेव । स्वार्थे ष्यञ् ।) सुखम् । इति हेमचन्द्रः ॥ यथा, उत्तररामचरिते २ अङ्के ।
"अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥"
सुखस्य भावः कर्म्म वा । सुख + ष्यञ् ।) सुखत्वम् । सुखस्यभावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

सौगतः, पुं, (सुगत एव । स्वार्थे अण् ।) बुद्धविशेषः । तत्पर्य्यायः । शून्यवादी २ । इति हेमचन्द्रः ॥ (यथा, माघे । २ । २८ ।
"सर्व्वकार्य्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥"
सुगतसम्बन्धिनि, सुगतमताध्यायिनि च त्रि ॥)

सौगतिकः, पुं, (सौगतं मतं वेत्तीति । ठक् ।) बुद्धविशेषः । इति केचित् ॥

सौगन्धं, क्ली, (सुष्ठु गन्धो यस्य । ततः स्वार्थे अण् ।) कत्तृणम् । यथा,—
"सौगन्धिकञ्च सौगन्धं रामकर्पूरके तृणे ॥"
इति शब्दरत्नावली ॥
(पुं, सङ्करजातिविशेषः । यथा, महाभारते । १३ । ४८ । २२ ।
"चतुरो मागधी सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्धमिति विश्रुतम् ॥"
शोभनगन्धयुक्ते, त्रि ॥

सौगन्धिकं, क्ली, (सुगन्धोऽस्त्यस्येति । सुगन्ध + ठन् । ततः स्वार्थे अण् ।) कत्तृणम् । (अस्य पर्य्यायो यथा,—
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा ।
भूतिकं व्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कह्लारम् । इत्यमरः । १ । १० । ३६ ॥ पद्मरागमणिः । इति मेदिनी ॥ नीलोत्पलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"इन्दीवरं कुवलयं पद्मं नीलोत्पलं स्मृतम् ।
सौगन्धिकं शतदलमब्जं कमलमुच्यते ॥"
इति गारुडे २०८ अध्यायः ॥
यथा, महाभारते । ३ । १५४ । २ ।
अपश्यत्तत्र पाञ्चाली सौगन्धिकमनुत्तमम् ।
अनिलोद्धृतमितो नूनं सा बहूनि परीप्सति ॥")

सौगन्धिकः, पुं, (सौगन्धोऽस्यास्तीति । ठन् ।) गन्धकः । इत्यमरः । २ । ८ । १०२ ॥ सुगन्धव्यवहारी । इति मेदिनी ॥ गन्धीति हिन्दी भाषा ॥ (स्त्री, क्रिमिविशेषः । यथा, चरके विमानस्थाने ७ अध्याये । "तेषां विविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि अन्त्रादा उदरादा हृदयादाश्च रवो दर्भपुष्पाः सौगन्धिका महागुदाश्च इति ॥")

सौगन्ध्यं, क्ली, सुगन्धत्वम् । सुगन्धस्य भाव इत्यर्थे सुगन्धशब्दात् ष्यञ् (ष्यञ्) प्रत्ययेन निष्पन्नम् ॥ ( यथा, महाभारते । १ । ६३ । ७८ ।
"एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ॥")

सौचिः, पुं, सौचिकः । इति शब्दरत्नावली ॥

सौचिकः, पुं, (सूच्या जीवतीति । सूची + ठक् ।) सूचीकर्म्मोपजीवी । दरजी इति भाषा । तत्पर्य्यायः । तुन्नवायः २ । इत्यमरः । २ । १० । ६ ॥ सूचिकः ३ सौचिः ४ सूत्रभित् ५ । इति शब्दरत्नावली ॥

सौजन्यं, क्ली, (सुजनस्य भावः कर्म्म वा । सुजन + ष्यञ् ।) सुजनता । यथा,—
"सौजन्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता विज्ञत्वं विनयित्वमिन्द्रियवशः सत्पात्रदाने रुचिः ।
सन्मन्त्री सुसुतः प्रिया प्रियतमा भक्तिश्च नारायणे
सत्पुण्येन विना त्रयोदश गुणाः संसारिणां दुर्लभा ॥"
इत्युद्भटः ॥

सौण्डी, स्त्री, पिप्पली । इति शब्दचन्द्रिका ॥ ( पिप्पलीशब्देऽस्या विशेषो विज्ञेयः ॥ )

सौत्रः, पुं, ( सूत्रं यज्ञसूत्रमर्हतीति । सूत्र + अण् । ) ब्राह्मणः । इति हेमचन्द्रः ॥ ( सूत्रे पठितः पाणिन्यादिभिः कर्म्मविशेषार्थेति । अण् ।) नियतप्रयोगाभावधातुविशेषः । यथा,-
"धातूनामिह सौत्राणां द्विचत्वारिंशदीरिताः ॥"
इति कविकल्पद्रुमः ॥
( सूत्रस्येदमित्यण् । ) सूत्रसम्बन्धिनि, त्रि ॥

सौत्रामणी, स्त्री, (सुत्रामा इन्द्रो देवता अस्याः । सुत्रामन् + अण् । बहुलवचनात् न टिलोपः । ततः स्त्रियां ङीप् ।) यागविशेषः । यथा । अथ सौत्रामणी त्रिभिरध्यायैः प्रक्रियते । स एतं महाक्रतुमपश्यत् सौत्रामणीमिति श्रुतेः । तत्र सुरां सन्धीयते । तत्र मन्त्रः । स्वाद्वीन्त्वा स्वादुना तीव्रां तीव्रेणामृतामृतेन । मधुमती मधुमता सृजामि सं सोमेन सोमोऽस्यश्विभ्यां पचस्व सरस्वत्यै पचस्वेन्द्राय सुत्राम्णे पचस्व ॥ सौत्रामण्याः ऋषिः प्रजापतिः । सुरा देवता । अनुष्टुप् छन्दः । इति यजुर्व्वेदस्य काण्वशाखायाम् २१ अध्यायः ॥ विस्तारस्तु तत्रैव २१ । २२ । २३ । अध्यायेषु द्रष्टव्यः । योगक्रमस्तु कात्यायनसूत्रभाष्ये द्रष्टव्यः ॥ (अत्र सुरां पित्वा ब्राह्मणः पतितो न भवति । यदुक्तम्,
"सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा पतितस्तु द्विजो भवेत् ॥"

सौदामनी, स्त्री, (सुदामा मेघः पर्व्वतो वा । तेन "एकदिक् । तेनैकदिक् ।" ४ । ३ । ११२ ॥ इति अण् ) विद्युत् । इत्यमरः । ३ । १ । ८ ॥ (सुदामा ऐरावतस्तस्य स्त्री सौदामनी पत्न्याः ङीप् वृद्धिश्च मनीषादित्वात् । श्वेतद्विपः सुदामा चेति ऐरावतपर्य्याये त्रिकाण्डशेषः ॥
"खेऽभ्रं जगाम काञ्चन-
सरसमसौदामनीलताधामास्तम् ।
कुवलयमयमिव सरजः
सरसमसौदामनीलताधामास्तम् ॥"
इति हरिप्रबोधयमकात् सौदामिनीत्यपपाठ इति मुकुटः । इति भरतः ॥*॥ यथा, महाभारते । १ । १७२ । ४२ ।
"ततो लालप्यमानस्य पार्थिवस्यायतेक्षणा ।
सौदामनीव चाभ्रेषु तत्रैवान्तरधीयत ॥")
अप्सरोभेदः । विद्युद्भेदः । इति मेदिनी ॥ ( यथा, भागवते । १ । ६ । २८ ।
"एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः ।
कालः प्रादुरभूत् काले तडित् सौदामनी यथा ॥"
सुदामा माला तत्र भवा सौदामनी मालाकारा इत्यर्थः । सुदामा पर्व्वतः तेनैकदिगिति सूत्रेण अण् स्फटिकमयपर्व्वतप्रान्तभागभवा हि विद्युदतिस्फुटा भवति । इति तट्टीकायां श्रीधरस्वामी ॥ )

सौदामिनी, स्त्री, विद्युत् । इत्यमरटीका । १ । ३ । ८ ।
( यथा, ऋतुसंहारे । ३ । १२ ।
"नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ॥"
तडिद्भेदः । ( यथा, महाभारते । ३ । ५३ । १२ ।
"तत्र स्म राजते भैमी सर्व्वाभरणभूषिता ।
सखीमध्येऽनवद्याङ्गी विद्युत् सौदामिनी यथा ॥"
अप्सरोभेदः । इति हेमचन्द्रः ॥ देशविशेषः । इत्यजयः ॥

सौदाम्नी, स्त्री, सौदामनी । इति शब्दरत्नावली ॥

सौदायिकं, त्रि, (सुदायेभ्यः पितृमातृभर्तृकुलसम्बन्धिभ्य आगतमिति । सुदाय + ठञ् ।) पितृमातृभर्तृकुललब्धस्त्रीधनम् । यथा, कात्यायनः ।
"ऊढ़या कन्यया वापि पत्युः पितृगृहेऽथवा ।
भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते
यस्मात् तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनम् ॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥"
सुदायेभ्यः पितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम् । आनृशंस्यमनैष्ठुर्य्यम् । इति दायतत्त्वम् ॥

सौदासः, पुं, इक्ष्वाकुवंशीयः अयोध्याधिपतिः । अस्य नामान्तरम् । कल्माषपादः १ मित्रसहः २ । इति पुराणम् ॥ (यथा, महाभारते । १ । १२२ । २१ ।
"सौदासेन च रम्भोरु नियुक्ता पुत्त्रजन्मनि ।
मदयन्ती जगामर्षिं वशिष्ठमिति नः श्रुतम् ॥"
अस्य विशेषविवरणन्तु कल्माषपादशब्दे द्रष्टव्यम् ॥ )